**पाठानुसार प्रश्नबैंक, वर्ष - 2023, 2024, 2025**

**कक्षा – X   विषय – कोड : 122**

**ध्यातव्य – उत्तर केवल सांकेतिक हैं।**

## प्रथम पाठ- शुचिपर्यावरणम्

| **< 1 > अंक के प्रश्न** | **मुख्य/पूरक परीक्षा** | **वर्ष** |
|---|---|---|
| **अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**<br>**1.** प्रस्तरतले <u>**लतातरुगुल्माः**</u> पिष्टाः न भवन्तु। | पूरक परीक्षा | 2025 |
| **2.** <u>**हरिततरूणां**</u> माला रमणीया। | मुख्य परीक्षा | 2024 |
| **3.** प्रस्तरतले <u>**लतातरुगुल्माः**</u> पिष्टाः न भवन्तु। | पूरक परीक्षा | 2023 |
| **4. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत**<br>रसालमुकुलानि <u>**भृङ्गाः**</u> समाश्रयन्ते।<br>(a) हया: (b) नागा: (c) गजा: (d) भ्रमरा: | मुख्य परीक्षा | 2024 |
| **< 4 > अंक के प्रश्न** | | |
| **5. मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत**<br>**प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः।**<br>**पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा॥**<br>**मानवाय जीवनं कामये नो जीवन्मरणम्। शुचि॥**<br>**अन्वयः -** (i) …………….. प्रस्तरतले पिष्टाः नो (ii) ……………..। निसर्गे (iii) …………….. सभ्यता समाविष्टा न (iv) ……………..। मानवाय जीवनं कामये नो जीवन्मरणम्।<br>**मञ्जूषा-** पाषाणी, स्यात्, लतातरूगुल्माः, भवन्तु | मुख्य परीक्षा | 2024 |
| **5 अंक के प्रश्न** | | |
| **6. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br>वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।<br>कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्॥<br>करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। शुचि ...॥<br>**i.) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) जलं कीदृशं न अस्ति ?<br>(ख) समलं किम् अभवत् ?<br>(ग) भृशं दूषितं किम् अस्ति ?<br>**ii.) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1= 2**<br>(क) मनुष्यैः कि करणीयम् ?<br>(ख) भक्ष्यं कीदृशं जातम् ?<br>(ग) शुद्धीकरणं कुत्र करणीयम् ? | मुख्य परीक्षा | 2023 |

| | | |
|---|---|---|
| **iii.) भाषिककार्यम् (केवलं प्रश्नद्वयम्) 2x1= 2**<br>(क) 'बहु' इति पदस्य पर्यायपदं किमस्ति ?<br>(ख) 'अन्तर्' इति पदस्य विपर्ययपदं किम् ?<br>(ग) 'जलम्' इति पदस्य विशेषणपदं किम् ? | | |
| **उत्तरमाला** | | |
| 1. के 2. केषां 3. के 4. (d) भ्रमराः 5. i-लतातरुगुल्माः ii-भवन्तु iii- पाषाणी iv-स्यात्<br>6. **पद्यांशः**– i) (क) निर्मलं (ख) धरातलम् (ग) जगति<br>ii) (क) मनुष्यैः बहिरन्तर्जगति बहु शुद्धीकरणं करणीयम्।<br>(ख) भक्ष्यं कुत्सितवस्तुमिश्रितं जातम्।<br>(ग) बहिरन्तर्जगति तु बहु शुद्धीकरणं करणीयम्।<br>iii) (क) भृशम् (ख) बहिः/बहिर् (ग) निर्मलम् | | |

**द्वितीयः पाठः– बुद्धिर्बलवती सदा**

| | | |
|---|---|---|
| **1 अंक के प्रश्न** | | |
| **अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**<br>**1.** तत्र राजसिंहः नाम **राजपुत्रः** वसति स्म। | मुख्य परीक्षा | 2025 |
| 2. पुरा त्वया **मह्यं** व्याघ्रत्रयं दत्तम्। | मुख्य परीक्षा | 2023 |
| **4 अंक के प्रश्न** | | |
| **3. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत।**<br>I. व्याघ्रः तां व्याघ्रमारीं मत्वा अधावत्।<br>II. तस्य भार्या बुद्धिमती आसीत्।<br>III. मार्गे सा एके व्याघ्रं ददर्श।<br>IV. बुद्धिमती व्याघ्रजाद् भयात् मुक्ताऽभवत्।<br>V. तत्र राजसिंहः नाम राजपुत्रः वसति स्म।<br>VI. अस्ति देउलाख्यो नाम ग्रामः।<br>VII. सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।<br>VIII. सा वाक्चातुर्येण बुद्धेः च प्रयोगेण व्याघ्रं भयभीतं कृतवती। | मुख्य परीक्षा | 2023 |
| **5 अंक के प्रश्नs** | | |
| **4. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br>अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"<br>i.) **एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) राजसिंहः कुत्र वसति स्म ?<br>(ख) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता? | मुख्य परीक्षा | 2025 |

| | | |
|---|---|---|
| (ग) सा कुत्र एकं व्याघ्रं ददर्श?<br>**ii.) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1= 2**<br>(क) सा पुत्रौ चपेटया प्रहृत्य किं जगाद ?<br>(ख) एकदा का पितुः गृहं प्रति चलिता ?<br>(ग) बुद्धिमती किमर्थं पितुर्गृहं प्रति चलिता ?<br><br>**iii.) भाषिककार्यम् (केवलं प्रश्नद्वयम्) 2x1= 2**<br>(क) 'जगाद' इति क्रियापदस्य कर्तृपदं किम् ?<br>(ख) 'व्याघ्रम्' इति पदस्य विशेषणपदं किम् ?<br>(ग) अनुच्छेदे 'अपश्यत्' इत्यस्य पदस्य कः पर्यायः प्रयुक्तः ? | | |

**उत्तरमाला**

1. कः 2. कस्मै 3.

| | | | |
|---|---|---|---|
| i. | अस्ति देउलाख्यो नाम ग्रामः। | ii. | तत्र राजसिंहः नाम राजपुत्रः वसति स्म। |
| iii. | तस्य भार्या बुद्धिमती आसीत्। | iv. | सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। |
| v. | मार्गे सा एके व्याघ्रं ददर्श। | vi. | सा वाक्चातुर्येण बुद्धेः च प्रयोगेण व्याघ्रं भयभीतं कृतवती। |
| vii. | व्याघ्रः तां व्याघ्रमारीं मत्वा अधावत्। | viii. | बुद्धिमती व्याघ्रजाद् भयात् मुक्ताऽभवत्। |

4. **गद्यांशः**–

**i)** (क) ग्रामे/ देउलाख्ये (ख) पितुर्गृहं प्रति ( ग) गहनकानने/ मार्गे

**(ii)** (क) सा पुत्रौ चपेटया प्रहृत्य जगाद "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

(ख) एकदा राजसिंहस्य भार्या/ बुद्धिमती पितुः गृहं प्रति चलिता।

(ग) बुद्धिमती केनापि आवश्यककार्येण पितुर्गृहं प्रति चलिता।

**(iii)** क) सा/ बुद्धिमती (ख) एकम्/ आगच्छन्तम् (ग) ददर्श

## तृतीय पाठ– शिशुलालनम्

| **< 1 > अंक के प्रश्न** | | |
|---|---|---|
| **अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**<br>1. जनकेन शैशवे **सुताय** विद्याधनं दीयते। | मुख्य परीक्षा | 2025 |
| 2. **भ्रातरौ** आवां सोदर्यौ स्वः। | मुख्य परीक्षा | 2025 |
| 3. तपोवनवासिनः जननीं **देवीनाम्ना** आह्वयन्ति। | | |
| **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत**<br>4. कथा चेयं **श्लाघ्या** सरसिरुहनाभस्य नियतम्।<br>(a) उन्नता (b) अलौकिकी (c) प्रशंसनीया (d) निन्दनीया | पूरक परीक्षा | 2025 |
| 5. कथा चेयं **श्लाघ्या** सरसिरुहनाभस्य नियतम्।<br>(a) उन्नता (b) अलौकिकी (c) प्रशंसनीया (d) निन्दनीया | पूरक परीक्षा | 2023 |
| **< 5 > अंक के प्रश्न** | | |
| **6. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** | पूरक परीक्षा | 2025 |

| | | |
|---|---|---|
| रामः– (स्वगतम्) धिङ् मामेवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्स्यति।<br>(सवाष्पमवलोकयति)<br>रामः– अतिदीर्घः प्रवासोऽयं दारुणश्च। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?<br>विदूषकः– (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी ?<br>लवः– तस्याः द्वे नामनी।<br>विदूषकः– कथमिव ?<br>लवः - तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति।<br>रामः– अपि च इतस्तावद् वयस्य! मुहूर्त्तमात्रम्।<br>विदूषकः– (उपसृत्य) आज्ञापयतु भवान्।<br>रामः– अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः ?<br>(नेपथ्ये)<br>इयती वेला सञ्जाता रामायणगानस्य नियोगः किमर्थं न विधीयते ?<br>उभौ - राजन्! उपाध्यायदूतोऽस्मान् त्वरयति।<br>रामः - मयापि सम्माननीय एव मुनिनियोगः।<br><br>**i.) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) अतिदीर्घः कः आसीत् ?<br>(ख) कुशलवयोः मातरं के 'देवी' इति नाम्ना आह्वयन्ति ?<br>(ग) भगवान् वाल्मीकिः सीतां किमुक्त्वा आह्वयति ?<br><br>**ii.) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) 2x1=2**<br>(क) उभौ किं वदतः?<br>(ख) श्रीरामस्य कुमारयोः च कः सर्वथा समरूपः आसीत्?<br>(ग) कः तयोः जनन्याः नाम पृच्छति?<br><br>iii.) **भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 2x1=2**<br>(क) 'माता' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?<br>(ख) 'भवान्' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम्?<br>(ग) 'इयती वेला' अनयोः पदयोः विशेषणपदं किम्? | | |
| **7. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>रामः– अहो! उदात्तरम्यः समुदाचारः। किं नामधेयो भवतोर्गुरुः?<br>लवः– ननु भगवान् वाल्मीकिः।<br>रामः– केन सम्बन्धेन ?<br>लवः– उपनयनोपदेशेन।<br>रामः– अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि।<br>लवः– न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।<br>रामः– अहो माहात्म्यम्।<br>कुशः– जानाम्यहं तस्य नामधेयम्।<br>रामः– कथ्यताम्। | मुख्य परीक्षा | 2024 |

| | | |
|---|---|---|
| कुशः– निरनुक्रोशो नाम ।<br>रामः– वयस्य, अपूर्वं खलु नामधेयम् ।<br>विदूषकः– (विचिन्त्य) एवं तावत् पृच्छामि । निरनुक्रोश इति क एवं भणति ?<br>कुशः– अम्बा।<br><br>**i.) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) लवस्य गुरोः नाम किम्?<br>(ख) लवकुशयोः गुरोः नाम कः पृच्छति?<br>(ग) लवस्य पितुः नाम कः जानाति?<br><br>**ii.) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1-2**<br>(क) वाल्मीकिः केन सम्बन्धेन लवकुशयोः गुरुः अस्ति?<br>(ख) कुशः स्वपितुः नाम किम् ज्ञापयति?<br>(ग) कः लवकुशयोः जनकस्य नाम वेदितुम् इच्छति?<br><br>**iii.) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) 2x1-2**<br>(क) 'वाल्मीकिः' इति पदस्य विशेषणपदं किम्?<br>(ख) 'जानामि' इति पदस्य कर्तृपदं किम्?<br>(ग) 'माता' इति पदस्य पर्यायपदं किं प्रयुक्तम्? | | |
| **8. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>रामः– (स्वगतम्) धिङ् मामेवंभूतम् । सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्स्यति ।<br>(सवाष्पमवलोकयति)<br>रामः– अतिदीर्घः प्रवासोऽयं दारुणश्च । (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?<br>विदूषकः– (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी ?<br>लवः– तस्याः द्वे नामनी ।<br>विदूषकः– कथमिव ?<br>लवः - तपोवनवासिनो देवीति नाम्नाह्वयन्ति, भगवान् वाल्मीकिर्वधूरिति ।<br>रामः– अपि च इतस्तावद् वयस्य! मुहूर्त्तमात्रम् ।<br>विदूषकः– (उपसृत्य) आज्ञापयतु भवान् ।<br>रामः– अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः ?<br>(नेपथ्ये)<br>इयती वेला सञ्जाता रामायणगानस्य नियोगः किमर्थं न विधीयते ?<br>उभौ - राजन्! उपाध्यायदूतोऽस्मान् त्वरयति ।<br>रामः - मयापि सम्माननीय एव मुनिनियोगः ।<br><br>**i.) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) अतिदीर्घः कः आसीत् ?<br>(ख) कुशलवयोः मातरं के 'देवी' इति नाम्ना आह्वयन्ति ?<br>(ग) भगवान् वाल्मीकिः सीतां किमुक्त्वा आह्वयति ? | पूरक परीक्षा | 2023 |

| | | |
|---|---|---|
| **ii.) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) 2x1=2**<br>(क) उभौ किं वदतः?<br>(ख) श्रीरामस्य कुमारयोः च कः सर्वथा समरूपः आसीत्?<br>(ग) कः तयोः जनन्याः नाम पृच्छति?<br><br>iii.) **भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 2x1=2**<br>(क) 'माता' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?<br>(ख) 'भवान्' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम्?<br>(ग) 'इयती वेला' अनयोः पदयोः विशेषणपदं किम्? | | |
| **उत्तरमाला** | | |

1. कस्मै 2. कौ 3. केन 4. (c) प्रशंसनीया 5. (c) प्रशंसनीया

**6. नाट्यांशः**– i) (क) प्रवासः (ख) तपोवासिनः (ग) वधूः

**ii)** (क) उभौ-राजन् ! उपाध्यायद्वतोऽस्मान् त्वरयति ।

(ख) श्रीरामस्य कुमारयोः च कुटुम्बवृत्तान्तः सर्वथा समरूपः आसीत् ।

(ग) विदूषकः तेषां जनन्याः नाम पृच्छति ।

**iii)** (क) जननी (ख) आज्ञापयतु (ग) इयती

**7. नाट्यांशः**– i ) (क) वाल्मीकिः (ख) रामः (ग) कुशः

**ii)** (क) ... उपनयनोपदेशेन... । (ख) ... निरनुक्रोशः...। (ग) ... रामः...।

**iii)** (क) भगवान् (ख) अहम् (ग) अम्बा

**8. नाट्यांशः**– i) (क) प्रवासः (ख) तपोवासिनः (ग) वधूः

**ii)** (क) उभौ-राजन् ! उपाध्यायद्वतोऽस्मान् त्वरयति ।

(ख) श्रीरामस्य कुमारयोः च कुटुम्बवृत्तान्तः सर्वथा समरूपः आसीत् ।

(ग) विदूषकः तेषां जनन्याः नाम पृच्छति ।

**iii)** (क) जननी (ख) आज्ञापयतु (ग) इयती

## चतुर्थ पाठ– जननी तुल्यवत्सला

| < 1 > अंक के प्रश्न | मुख्य/ पूरक परीक्षा | वर्ष |
|---|---|---|
| **अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**<br>1. **धेनूनां** माता सुरभिः आसीत् । | पूरक परीक्षा | 2025 |
| 2. अयम् अन्येभ्यो दुर्बलः। | मुख्य परीक्षा | 2023 |
| 3. **धेनूनां** माता सुरभिः आसीत् । | पूरक परीक्षा | 2023 |
| 4. **सुरभिः** पुत्रस्य दैन्यं दृष्ट्वा रोदिति । | मुख्य परीक्षा | 2024 |
| **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत**<br>5. (v) सर्वेषु **अपत्येषु** जननी तुल्यवत्सला । | मुख्य परीक्षा | 2025 |

| | | |
|---|---|---|
| (a) सन्ततिषु (b) पुत्रीषु (c) शिष्येषु (d) जनेषु | | |
| 6. कृषकस्य गृहे द्वौ **बलीवर्दौ** आस्ताम्।<br>(a) वृषभौ (b) अश्वौ (c) अजौ (d) खगौ | पूरक परीक्षा | 2025 |
| 7. कृषकस्य गृहे द्वौ **बलीवर्दौ** आस्ताम्।<br>(a) वृषभौ (b) अश्वौ (c) अजौ (d) खगौ | पूरक परीक्षा | 2023 |
| 8. एकः दुर्बलः **बलीवर्दः** भूमौ पपात।<br>(a) गौः (b) धेनुः (c) वृषभः (d) महिषः | मुख्य परीक्षा | 2023 |
| 9. तदा तत्र **सुराधिपः** आगच्छत्।<br>(a) नृपः (b) कृषकः (c) धेनुः (d) इन्द्रः | मुख्य परीक्षा | 2023 |
| **10. वासव!** अहं पुत्रस्य दैन्यं दृष्ट्वा रोदिमि।<br>(a) पुत्र ! (b) इन्द्र ! (c) गणेश ! (d) शिव ! | मुख्य परीक्षा | 2024 |
| **< 4 > अंक के प्रश्न** | | |
| **11. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत -**<br>(i) एकः कृषकः आसीत्।<br>(ii) कृषकः तं दुर्बलं वृषभं तोदनेन अवर्तत।<br>(iii) तस्य समीपे द्वौ बलीवर्दौ आस्ताम्।<br>(iv) कृषीवलः कुद्धः अभवत्।<br>(v) सः जवेन गन्तुम् अशक्तः च आसीत्।<br>(vi) तमुत्थापयितुम् बहुवारं यत्नमकरोत् तथापि सः नोत्थितः।<br>(vii) सः ऋषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात।<br>(viii) तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत्। | पूरक परीक्षा | 2025 |
| **12.**<br>(i) एकः कृषकः आसीत्।<br>(ii) कृषकः तं दुर्बलं वृषभं तोदनेन अवर्तत।<br>(iii) तस्य समीपे द्वौ बलीवर्दौ आस्ताम्।<br>(iv) कृषीवलः कुद्धः अभवत्।<br>(v) सः जवेन गन्तुम् अशक्तः च आसीत्।<br>(vi) तमुत्थापयितुम् बहुवारं यत्नमकरोत् तथापि सः नोत्थितः।<br>(vii) सः ऋषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात।<br>(viii) तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत्। | पूरक परीक्षा | 2023 |
| **< 5 > अंक के प्रश्न** | | |
| **13. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**<br>सुरभिः– भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न ?" इति प्रत्यवोचत्।<br><br>"भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तवं अस्मिन्नेव एतादृशं वात्सल्यं कथम्?" इति इन्द्रेण पृष्टा सुरभिः प्रत्यवोचत्– "बहून्यपत्यानि मे सन्तीति सत्यम् तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि | मुख्य परीक्षा | 2025 |

| | | |
|---|---|---|
| दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।<br>स च तामेवमसान्त्वयत्- "गच्छ वत्से। सर्वं भद्रं जायेत।"<br>**(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) कस्य दैन्यं दृष्ट्वा सा रोदिति?<br>(ख) सर्वेष्वपत्येषु का तुल्यवत्सला ?<br>(ग) सः केन भारमुद्वहति?<br>**(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2×1=2**<br>(क) कस्मिन् मातुः अभ्यधिका कृपा सहजैव ?<br>(ख) सुरभिवचनं श्रुत्वा किम् अभवत् ?<br>(ग) आखण्डलः किं कथयित्वा सुरभिम् असान्त्वयत् ?<br>**(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 2×1=2**<br>(क) 'सुते' इति पदस्य विशेषणपदं किम् ?<br>(ख) 'पीडयति' इति क्रियापदस्य कर्तृपदं किम् ?<br>(ग) 'आकर्ण्य' इति पदस्य पर्यायपदं किं प्रयुक्तम् ? | | |

**उत्तरमाला**

1. कासाम् 2. केभ्यः 3. कासाम् 4. का 5. (a) सन्ततिषु 6. (a) वृषभौ 7. (a) वृषभौ 8. (c) वृषभः
9. (d) इन्द्रः 10. (b) इन्द्र !

11.

| | | | |
|---|---|---|---|
| I. | एकः कृषकः आसीत्। | II. | तस्य समीपे द्वौ बलीवर्दौ आस्ताम्। |
| III. | तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत्। | IV. | कृषकः तं दुर्बलं वृषभं तोदनेन अवर्तत। |
| V. | सः जवेन गन्तुम् अशक्तः च आसीत्। | VI. | सः ऋषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात। |
| VII. | तमुत्थापयितुम् बहुवारं यत्नमकरोत् तथापि सः नोत्थितः | VIII. | कृषीवलः कुद्धः अभवत्। |

12.

| | | | |
|---|---|---|---|
| I. | एकः कृषकः आसीत्। | II. | तस्य समीपे द्वौ बलीवर्दौ आस्ताम्। |
| III. | तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत्। | IV. | कृषकः तं दुर्बलं वृषभं तोदनेन अवर्तत। |
| V. | सः जवेन गन्तुम् अशक्तः च आसीत्। | VI. | सः ऋषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात। |
| VII. | तमुत्थापयितुम् बहुवारं यत्नमकरोत् तथापि सः नोत्थितः। | VIII. | कृषीवलः कुद्धः अभवत्। |

**13.** i) - (क) पुत्रस्य (ख) जननी (ग) कृच्छ्रेण

ii) (क) दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव।
(ख) सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।
(ग) आखण्डलः इदं कथयित्वा सुरभिम् असान्त्वयत्- "गच्छ वत्से ! सर्वं भद्रं जायेत।"
iii) (क) दुर्बले (ख) कृषकः (ग) श्रुत्वा

## पञ्चम पाठ– सुभाषितानि

<table>
<tr><td colspan="3">< 1 > अंक के प्रश्न</td></tr>
<tr><td>अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्ग्रानुकूलम् उचितार्थं चित्वा लिखत<br>1. अश्वश्चेद् धावने वीरः भारस्य वहने <u>खरः</u>।<br>(a) गजः (b) सिंहः (c) गर्दभः (d) व्याघ्रः</td><td>मुख्य परीक्षा</td><td>2025</td></tr>
<tr><td>2. नराणां प्रथमः <u>शत्रुः</u> आलस्यम् अस्ति।<br>(a) मानवः (b) मित्रम् (c) रिपुः (d) सहायकः</td><td>मुख्य परीक्षा</td><td>2023</td></tr>
<tr><td>3. फलच्छायासमन्वितः <u>वृक्षः</u> सेवितव्यः।<br>(a) तरुः (b) खगः (c) छाया (d) मानवः</td><td>मुख्य परीक्षा</td><td>2023</td></tr>
<tr><td colspan="3">< 4 > अंक के प्रश्न</td></tr>
<tr><td>4. मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत।<br>मृगा मृगैः सङ्गमनुव्रजन्ति, गावश्च गोभिः तुरगास्तुरङ्गैः।<br>मूर्खाश्च मूर्खैः सुधियः सुधीभिः, समान-शील-व्यसनेषु सख्यम्।<br>अन्वयः - मृगाः (i) ………………. गावश्च गोभिः (ii) ………………. तुरङ्गैः, मूर्खाः मूर्खैः, सुधियः सुधीभिः सङ्गम् (iii) ………………. (iv) ………………. समान-शील व्यसनेषु (भवति)।<br>मञ्जूषा – सख्यम्, मृगैः, तुरगाः, अनुव्रजन्ति।</td><td>मुख्य परीक्षा</td><td>2023</td></tr>
<tr><td colspan="3">< 5 > अंक के प्रश्न</td></tr>
<tr><td>5. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -<br>गुणी गुणं वेत्ति न वेत्ति निर्गुणो,<br>बली बलं वेत्ति न वेत्ति निर्बलः।<br>पिको वसन्तस्य गुणं न वायसः,<br>करी च सिंहस्य बलं न मूषकः॥<br><br>(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1<br>(क) कीदृशः जनः गुणं जानाति ?<br>(ख) कीदृशः जनः गुणं न जानाति?<br>(ग) सिंहस्य बलं को जानाति?<br><br>(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2×1=2<br>(क) वसन्तस्य गुणं कः जानाति कः च न जानाति ?<br>(ख) मूषकः कस्य बलं न जानाति ?<br>(ग) कः बलस्य गुणं जानाति कः च न जानाति ?<br><br>(iii) भाषिककार्यम् (केवलं प्रश्नद्वयम्) 2x1=2<br>(क) श्लोके 'जानाति' इति पदस्य पर्यायपदं किम् आगतम् ?<br>(ख) 'गुणी गुणं वेत्ति' अत्र कर्तृपदं किम् ?<br>(ग) 'निर्बलः' इति पदस्य विपर्ययपदं किम् अत्र प्रयुक्तम् ?</td><td>पूरक परीक्षा</td><td>2025</td></tr>
</table>

| | | |
|---|---|---|
| **6. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**गुणी गुणं वेत्ति न वेत्ति निर्गुणो,**<br>**बली बलं वेत्ति न वेत्ति निर्बलः ।**<br>**पिको वसन्तस्य गुणं न वायसः,**<br>**करी च सिंहस्य बलं न मूषकः ॥**<br><br>**(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) कीदृश: जनः गुणं जानाति ?<br>(ख) कीदृशः जनः गुणं न जानाति?<br>(ग) सिंहस्य बलं को जानाति?<br><br>**(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2×1=2**<br>(क) पिकः किं जानाति वायसः च किं न जानाति ?<br>(ख) करी कस्य बलं  जानाति ?<br>(ग) कः बलस्य गुणं जानाति कः च न जानाति ?<br><br>**(iii) भाषिककार्यम् (केवलं प्रश्नद्वयम्)** 2x1=2<br>(क) श्लोके 'जानाति' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?<br>(ख) 'गुणी गुणं वेत्ति' अत्र कर्तृपदं किम् ?<br>(ग) 'निर्बलः' इति पदस्य विपर्ययपदं किम् अत्र प्रयुक्तम् ? | पूरक परीक्षा | 2023 |

**उत्तरमाला**

1. (c) गर्दभः, 2.  (c) रिपुः, 3. (a) तरुः  4. i) मृगैः ii) तुरगाः iii) अनुव्रजन्ति iv) सख्यम्

5. i) (क) गुणी (ख) निर्गुणः (ग) करी

ii) (क) पिकः वसन्तस्य गुणं जानाति वायसः च वसन्तस्य गुणं न जानाति ।

(ख) करी सिंहस्य बलं जानाति ।

(ग) बली बलस्य गुणं जानाति निर्बलः च बलस्य गुणं न जानाति ।

iii) (क) वेत्ति (ख) गुणी  (ग) बली

6. i) (क) गुणी (ख) निर्गुणः (ग) करी

ii) (क) पिकः वसन्तस्य गुणं जानाति वायसः च वसन्तस्य गुणं न जानाति ।

(ख) करी सिंहस्य बलं जानाति ।

(ग) बली बलस्य गुणं जानाति निर्बलः च बलस्य गुणं न जानाति ।

iii) (क) वेत्ति (ख) गुणी  (ग) बली

## षष्ठ पाठ– सौहार्दं प्रकृतेः शोभा

| | | |
|---|---|---|
| **1 अंक के प्रश्न** | | |
| **अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**<br>1. मयूरस्य नृत्यं **प्रकृतेः** आराधना। | पूरक परीक्षा | 2025 |
| 2. **प्रकृत्याः** सन्निधौ वास्तविकं सुखं विद्यते। | मुख्य परीक्षा | 2025 |
| 3. सिंहः **वानराभ्यां** स्वरक्षायाम् असमर्थः एवासीत्। | मुख्य परीक्षा | 2025 |
| 4. मयूरस्य नृत्यं **प्रकृतेः** आराधना। | पूरक परीक्षा | 2023 |
| 5. काकः **कृष्णः** भवति। | मुख्य परीक्षा | 2024 |
| **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थ चित्वा लिखत-**<br>**6.** अहं शीतले जले अविचलः **स्थितप्रज्ञः** इव तिष्ठामि।<br>**(a)** प्रज्ञा (b) योगी (c) भोगी (d) रोगी | पूरक परीक्षा | 2025 |
| **7. वायसः** वसन्तस्य गुणं न जानाति।<br>(a) पिकः (b) काकः (c) मयूरः (d) शुकः | मुख्य परीक्षा | 2025 |
| **8. अनृतं** वदसि चेत् काकः दशेत्।<br>(a) उच्चैः (b) शनैः (c) सत्यम् (d) असत्यम् | मुख्य परीक्षा | 2025 |
| 9. अहं शीतले जले अविचलः **स्थितप्रज्ञः** इव तिष्ठामि।<br>(a) प्रज्ञा (b) योगी (c) भोगी d) रोगी | पूरक परीक्षा | 2023 |
| 10. **अपरः** वानरः सिंहस्य पुच्छं धुनाति।<br>(a) अनेकाः (b) अन्यः (c) प्रथमः (d) एकः | मुख्य परीक्षा | 2024 |
| **< 4 > अंक के प्रश्न** | | |
| **11.अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत -**<br><br>**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।**<br>**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥**<br><br>**भावार्थः -** अस्य भावोऽस्ति यत् काकस्य वर्णः (i) ……………… वर्तते(ii) ……………… अपि वर्णः कृष्णः एव अस्ति। अतः तयोः(iii) ……………… मध्ये कः भेदः अस्ति? अर्थात् वर्णदृष्ट्या तयोः कश्चिद् भेदो न दृश्यते। परन्तु यदा समयः(iv) ……………… आगच्छति तदा तयोः स्वैरः ज्ञायते यत् कः काकः अस्ति कश्च पिको वर्तते।<br><br>**मञ्जूषा** वसन्तस्य, पिकस्य, पिककाकयोः, कृष्णः | मुख्य परीक्षा | 2025 |
| **12. अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत -**<br><br>**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।**<br>**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥**<br><br>**भावार्थः -** अस्य भावोऽस्ति यत् (i) ……………… वर्णः कृष्णः वर्तते पिकस्य अपि वर्णः (ii) ……………… एव अस्ति। अतः तयोः पिके काके च कः भेदः अस्ति, अर्थात् वर्णदृष्ट्या | पूरक परीक्षा | 2025 |

| | | |
|---|---|---|
| तयोः कश्चिद् भेदो न दृश्यते। परन्तु यदा (iii) ……………… समयः आगच्छति तदा तयोः स्वरैः ज्ञायते यत् कः (iv) ……………… अस्ति कश्च पिको वर्तते ।<br><br>**मञ्जूषा** | | |
| **13. अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत -**<br><br>**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।**<br>**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥**<br><br>**भावार्थः -** अस्य भावोऽस्ति यत् (i) ……………… वर्णः कृष्णः वर्तते पिकस्य अपि वर्णः (ii) ……………… एव अस्ति । अतः तयोः पिके काके च कः भेदः अस्ति, अर्थात् वर्णदृष्ट्या तयोः कश्चिद् भेदो न दृश्यते। परन्तु यदा (iii) ……………… समयः आगच्छति तदा तयोः स्वरैः ज्ञायते यत् कः (iv) ……………… अस्ति कश्च पिको वर्तते ।<br><br>**मञ्जूषा** वसन्तस्य, काकस्य, काकः, कृष्णः | पूरक परीक्षा | 2023 |
| **14. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत -**<br>(i) एकः सिंहः विश्राम्यते स्म।<br>(ii) ततः प्रकृतिमाता प्रविशति ।<br>(iii) वानराः तं तुदन्ति स्म।<br>(iv) अधुना पशुः राजा न भवेत् अपितु कोऽपि पक्षी एव राजेति निश्चेतव्यम् ।<br>(v) सर्वे प्राणिनः सिंहस्य दशां दृष्ट्वा हसन्ति ।<br>(vi) सर्वेषां प्राणिनामेव यथासमयं महत्त्वं विद्यते।<br>(vii) सर्वे प्राणिनः परस्परं विवादं कुर्वन्ति आत्मानं योग्यं च कथयन्ति। अन्ते निर्णयं कुर्वन्ति यत्<br>(viii) मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम् । | मुख्य परीक्षा | 2025 |
| **< 5 > अंक के प्रश्न** | | |
| **15. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**<br>(एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ एतं विवादं श्रृणुतः बदतः च)<br>व्याघ्रचित्रकौ - अरे किं वनराजपदाय सुपात्रं चीयते ? एतदर्थं तु आवामेव योग्यौ । यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मतया।<br>सिंहः– तूष्णीं भव भोः । युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ । एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अतएव विचारविमर्शः प्रचलति ।<br>बकः- सर्वथा सम्यगुक्तम् सिंहमहोदयेन । वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति ।<br>सर्वे पक्षिणः - आम् आम् - कश्चित् खगः एव वनराजः भविष्यति इति ।<br>**(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1** | मुख्य परीक्षा | 2023 |

(क) कौ नदीजलं पातुमागतौ ?

(ख) 'तूष्णी भव' इति कः कथयति ?

(ग) किमर्थं सुपात्रं चीयते ?

(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2

(क) तत्र किमर्थं विचारविमर्शः प्रचलति ?

(ख) अधुना किं निश्चेतव्यम् ?

(ग) सर्वे पक्षिणः किं कथयन्ति ?

(iii) भाषिककार्यम् - 2x1=2

(क) 'एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुम् आगतौ' वाक्ये किं कर्तृपदम् प्रयुक्तम् ?

(ख) 'पक्षिणः' इति विशेष्यपदस्य विशेषणपदं किम् ?

(ग) 'कलहम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

**उत्तरमाला**

1. कस्याः 2. कस्याः 3.काभ्यां 4.कस्याः 5. कीदृशः 6. (b) योगी 7. (b) काकः 8. (d) असत्यम् 9. (b) योगी 10. (b) अन्यः

11. (i) कृष्णः (ii) पिकस्य (iii) पिककाकयोः (iv) वसन्तस्य

12. (i) काकस्य (ii) कृष्णः (iii) वसन्तस्य (iv) काकः

13. (i) काकस्य (ii) कृष्णः (iii) वसन्तस्य (iv) काकः

14.

| | | | |
|---|---|---|---|
| i.) | एकः सिंहः विश्राम्यते स्म। | ii.) | वानराः तं तुदन्ति स्म। |
| iii.) | सर्वे प्राणिनः सिंहस्य दशां दृष्ट्वा हसन्ति । | iv.) | सर्वे प्राणिनः परस्परं विवादं कुर्वन्ति आत्मानं योग्यं च कथयन्ति। अन्ते निर्णयं कुर्वन्ति यत् |
| v.) | अधुना पशुः राजा न भवेत् अपितु कोऽपि पक्षी एव राजेति निश्चेतव्यम् । | vi.) | ततः प्रकृतिमाता प्रविशति । |
| vii.) | सर्वेषां प्राणिनामेव यथासमयं महत्त्वं विद्यते। | viii.) | मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम् । |

15. **(i)** क) व्याघ्रचित्रकौ (ख) सिंहः (ग) वनराजपदाय

**(ii)** (क) ... भक्षकं रक्षकपदयोग्यं न मन्यन्ते...

(ख) ... कोऽपि पक्षी एव राजेति...

(ग)... कश्चित् खगः... भविष्यति।

**(iii)** (क) व्याघ्रचित्रकौ (ख) सर्वे (ग) विवादम्

## सप्तम पाठ- विचित्रः साक्षी

**< 1 > अंक के प्रश्न**

**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत :**

1. कश्चन निर्धनः **वित्तम्** उपार्जितवान् ।

(a) वायुम् (b) फलम् (c) धनम् (d) अन्नम्

**< 4 > अंक के प्रश्न**

| | | |
|---|---|---|
| **2. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत**<br><br>**दुष्कराण्यपि कर्माणि मतिवैभवशालिनः ।**<br>**नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते ॥**<br><br>**अन्वयः -** मतिवैभवशालिनः (जनाः) (i) ……………… युक्तिं (च) (ii) ………………<br>दुष्कराणि (iii) ……………… कर्माणि (iv) ……………… एव प्रकुर्वते।<br><br>**मञ्जूषा** लीलया, नीतिम्, अपि, समालम्ब्य | मुख्य परीक्षा | 2025 |
| **3. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत**<br><br>**दुष्कराण्यपि कर्माणि मतिवैभवशालिनः ।**<br>**नीति युक्ति समालम्ब्य लीलयैव प्रकुर्वते ॥**<br><br>**अन्वयः -** मतिवैभवशालिनः (जनाः) (i) ……………… युक्तिं (च) (ii) ………………<br>दुष्कराणि (iii) ……………… कर्माणि (iv) ……………… एव प्रकुर्वते।<br><br>**मञ्जूषा** लीलया, नीतिम्, अपि, समालम्ब्य | पूरक परीक्षा | 2025 |
| **4. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत**<br><br>**दुष्कराण्यपि कर्माणि मतिवैभवशालिनः ।**<br>**नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते ॥**<br><br>**अन्वयः -** मतिवैभवशालिनः (जनाः) (i) ……………… युक्तिं (च) (ii) ………………<br>दुष्कराणि (iii) ……………… कर्माणि (iv) ……………… एव प्रकुर्वते।<br><br>**मञ्जूषा** लीलया, नीतिम्, अपि, समालम्ब्य | पूरक परीक्षा | 2023 |
| **5. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत**<br>(i) निर्धनस्य पुत्रः छात्रावासे निवसन् अध्ययने संलग्नो जातः।<br>(ii) तेन वित्तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं कारितवान् ।<br>(iii) कश्चन निर्धनः जनः परिश्रमेण किञ्चित् धनम् अर्जितवान् ।<br>(iv) पुत्रस्य रुग्णतां श्रुत्वा पिता व्याकुलो जातः।<br>(v) पुत्रः छात्रावासे रुग्णः जातः ।<br>(vi) सायङ्कालो जातः परं गन्तव्यात् सः पुत्रः दूरे आसीत् ।<br>(vii) निर्धन: स्वपुत्रं द्रष्टुं पदातिः एव प्राचलत् ।<br>(viii) स: पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कमपि गृहम् उपागतः। | मुख्य परीक्षा | 2024 |
| **< 5 > अंक के प्रश्न** | | |

| | | |
|---|---|---|
| **6. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br><br>अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान् । न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक् पृथक् विवरणं श्रुतवान् । सर्वं वृत्तमवगत्य सः तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान् । अन्येद्युः तौ न्यायालये स्व-स्व-पक्षं पुनः स्थापितवन्तौ। तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः । तस्य मृतशरीरं राजमार्गं निकषा वर्तते । आदिश्यतां किं करणीयमिति । न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान् ।<br><br>**(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) न्यायाधीशस्य नाम किम् ?<br>(ख) न्यायाधीशः तम् अतिथिं कीदृशम् अमन्यत ?<br>(ग) तौ कुत्र स्व-स्व-पक्षं स्थापितवन्तौ?<br><br>**(ii) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1-2**<br>(क) न्यायाधीशः किम् आदिष्टवान्?<br>(ख) कर्मचारी किं न्यवेदयत्?<br>(ग) न्यायाधीशः किमर्थं निर्णेतुं नाशक्नोत्?<br><br>**(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) 2x1-2**<br>क) 'न्यवेदयत्' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम् ?<br>(ख) 'अग्रिमे' इति विशेषणपदस्य विशेष्यपदं किम् ?<br>(ग) 'दूरम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ? | **पूरक परीक्षा** | **2025** |
| **7. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः । भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत् । स भारवेदनया क्रन्दति स्म । तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच "रे दुष्ट ! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः । इदानीं निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत् । यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ । न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ । आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यम् अघटत् स शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि 'त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अतः निजकृत्यस्य फलं भुङ्क्ष्व।<br><br>**(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) सुपुष्टदेहः कः आसीत्?<br>(ख) अभियुक्ताय भारवतः कस्य वहनं दुष्करम् आसीत्?<br>(ग) कृशकायः कः आसीत्?<br><br>**(ii) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1-2**<br>(क) आरक्षी अभियुक्तं प्रति दण्डविषये किम् प्रोच्य उच्चैः अहसत्?<br>(ख) अभियुक्तः कया क्रन्दति स्म? | मुख्य परीक्षा | 2024 |

| | | |
|---|---|---|
| (ग) उभौ शवम् आनीय कुत्र स्थापितवन्तौ?<br><br>**(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) 2x1-2**<br>(क) त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे अत्र वाक्ये कर्तृपदं किम्?<br>(ख) 'चोरितायाः' इति विशेषणपदस्य विशेष्यपदं किम् ?<br>(ग) 'प्रणम्य' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ? | | |
| **8. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br>कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा 'इति विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।<br><br>**(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) कीदृशः जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् ?<br>(ख) तनयः कुत्र निवसन् अध्ययने संलग्नः समभूत् ?<br>(ग) करुणापरो गृही कस्मै आश्रयं प्रायच्छत् ?<br><br>**(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2**<br>(क) स पिता किमर्थं व्याकुलो जातः ?<br>(ख) सः किं विचार्य पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः ?<br>(ग) अर्जितेन वित्तेन सः जनः किम् अकरोत् ?<br><br>**(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) 2x1= 2**<br>(क) ‘‘परमर्थकार्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्" अत्र वाक्ये कर्तृपदं किम् ?<br>(ख) 'करुणापरः' इति विशेषणपदस्य विशेष्यपदं किम् ?<br>(ग) 'पुत्रस्य' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ? | मुख्य परीक्षा | 2023 |
| **9. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br><br>अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक् पृथक् विवरणं श्रुतवान्। सर्वं वृत्तमवगत्य सः तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्। अन्येद्युः तौ न्यायालये स्व-स्व-पक्षं पुनः स्थापितवन्तौ। तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः। तस्य मृतशरीरं राजमार्गं निकषा वर्तते। आदिश्यतां किं करणीयमिति। न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।<br><br>**(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) न्यायाधीशस्य नाम किम् ? | पूरक परीक्षा | 2023 |

| | | |
|---|---|---|
| (ख) न्यायाधीशः तं कीदृशम् अमन्यत ?<br>(ग) तौ कुत्र स्व-स्व-पक्षं स्थापितवन्तौ?<br><br>**(ii) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1-2**<br>(क) न्यायाधीशः किम् आदिष्टवान्?<br>(ख) कर्मचारी किं न्यवेदयत्?<br>(ग) न्यायाधीशः किमर्थं निर्णेतुं नाशक्नोत्?<br><br>**(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) 2x1-2**<br>क) 'न्यवेदयत्' इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम् ?<br>(ख) 'अग्रिमे' इति विशेषणपदस्य विशेष्यपदं किम् ?<br>(ग) 'दूरम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ? | | |
| **उत्तरमाला** | | |

1. (c) धनम् 2. (i) नीतिम् (ii) समालम्ब्य (iii) अपि (iv) लीलया

3. (i) नीतिम् (ii) समालम्ब्य (iii) अपि (iv) लीलया 4. (i) नीतिम् (ii) समालम्ब्य (iii) अपि (iv) लीलया

5.

| | | | |
|---|---|---|---|
| i.) | कश्चन निर्धनः जनः परिश्रमेण किञ्चित् धनम् अर्जितवान्। | ii.) | तेन वित्तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं कारितवान्। |
| iii.) | निर्धनस्य पुत्रः छात्रावासे निवसन् अध्ययने संलग्नो जातः। | iv.) | पुत्रः छात्रावासे रुग्णः जातः। |
| v.) | पुत्रस्य रुग्णतां श्रुत्वा पिता व्याकुलो जातः। | vi.) | निर्धन: स्वपुत्रं द्रष्टुं पदातिः एव प्राचलत्। |
| vii.) | सायङ्कालो जातः परं गन्तव्यात् सः पुत्रः दूरे आसीत्। | viii.) | स: पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कमपि गृहम् उपागतः। |

6.

(i) (क) बंकिमचन्द्रः (ख) निर्दोषम् (ग) न्यायालये

(ii) (क) न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।

(ख) कर्मचारी न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः, तस्य मृतशरीरं राजमार्गं निकषा वर्तते।

(ग) न्यायाधीशः प्रमाणाभावात् निर्णेतुं नाशक्नोत्।

(iii) (क) कर्मचारी (ख) दिने (ग) निकषा

7. (i) (क) आरक्षी (ख) शवस्य (ग) अभियुक्ताः

(ii) (क) रे दुष्ट ! अस्मिन् चौर्याभियोगे......लप्स्यसे।

(ख) ... भारवेदनया...।

(ग) ... एकस्मिन् चत्वरे...।

(iii) (क) त्वम् (ख) मञ्जूषायाः (ग) अभिवाद्य

8.

(i) (क) निर्धनः (ख) छात्रावासे (ग) निर्धनजनाय

(ii) (क)......तनूजस्य रूग्णतामाकर्ण्य

(ख)... निशान्धकारे प्रसृते विजने... शुभावहा

| |
|---|
| (ग)... महाविद्यालये प्रवेशं....<br>(iii) (क) सः (ख) गृही (ग) तनूजस्य<br>9.<br>(i) (क) बंकिमचन्द्रः (ख) निर्दोषम् (ग) न्यायालये<br>(ii) (क) न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।<br>(ख) कर्मचारी न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः, तस्य मृतशरीरं राजमार्गं निकषा वर्तते।<br>(ग) न्यायाधीशः प्रमाणाभावात् निर्णेतुं नाशक्नोत्।<br>(iii) (क) कर्मचारी (ख) दिने (ग) निकषा |

**अष्टम पाठ– सूक्तयः**

| **1 अंक के प्रश्न** | **मुख्य/पूरक परीक्षा** | **वर्ष** |
|---|---|---|
| **अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**<br>1. यः आत्मनः **श्रेयः** इच्छति। | पूरक परीक्षा | 2025 |
| 2. आत्मकल्याणम् इच्छन् नरः कदापि **परेषाम्** अहितं कर्म न कुर्यात्। | पूरक परीक्षा | 2023 |
| **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत**<br>3. अन्येषां **वदने** ये तु ते चक्षुनामनी मते।<br>(a) मस्तके (b) दशने (c) हृदये (d) मुखे | मुख्य परीक्षा | 2024 |
| 4. अन्येषां **वदने** ये तु ते चक्षुनामनी मते।<br>(a) मस्तके (b) दशने (c) हृदये (d) मुखे | मुख्य परीक्षा | 2023 |
| **< 4 > अंक के प्रश्न** | | |
| **5.अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत।**<br>आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।<br>तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥<br><br>**भावार्थः -** अस्य भावोऽस्ति यत् सदाचारः जनानां (i) …………….. धर्मः अस्ति, इति ii)……………. कथयन्ति अतएव जनैः (iii) …………….. रक्षा प्राणेभ्यः अपि (iv) …………….. करणीया।<br><br>**मञ्जूषा–** विद्वांसः, विशेषतया प्रथमः, सदाचारस्य | मुख्य परीक्षा | 2023 |
| **< 5 > अंक के प्रश्न** | | |
| **6. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br><br>**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**<br>**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥**<br>**(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) पिता कदा विद्याधनं यच्छति ?<br>(ख) पिता कस्मै विद्याधनं यच्छति ?<br>(ग) कः तपः तेपे ? | मुख्य परीक्षा | 2024 |

| | | |
|---|---|---|
| **(ii) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1-2**<br>(क) का उक्तिः कृतज्ञता ?<br>(ख) पिता पुत्राय कीदृशं विद्याधनं यच्छति ?<br>(ग) पिता पुत्राय बाल्ये कीदृशं धनं यच्छति ?<br><br>**(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) 2x1-2**<br>क) 'सुताय' इति पदस्य पर्यायपदं किम् ?<br>(ख) 'महत्' इति पदस्य विशेष्यपदं किम् ?<br>(ग) 'यच्छति' इति पदस्य कर्तृपदं किम् ? | | |
| **उत्तरमाला** | | |
| 1. किं 2.केषां 3. (d) मुखे 4. (d) मुखे 5. (i) प्रथमः, (ii) विद्वांसः (iii) सदाचारस्य (iv) विशेषतया<br>6. (i) (क) बाल्ये (ख) पुत्राय (ग) पिता<br>(ii) (क) ... पिता किं तपस्तेपे...।<br>(ख) ... महत्...।<br>(ग) ... विद्याधनं...।<br>(iii) (क) पुत्राय (ख) विद्याधनम् (ग) पिता | | |

## नवम पाठ– भूकम्पविभीषिका

| | मुख्य/ पूरक परीक्षा | वर्ष |
|---|---|---|

## दशम पाठ-अन्योक्तयः

| < 1 > अंक के प्रश्न | मुख्य/ पूरक परीक्षा | वर्ष |
|---|---|---|
| **अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**<br>1. <u>**पतङ्गाः**</u> अम्बरपथम् आपेदिरे। | पूरक परीक्षा | 2025 |
| 2. <u>**चातकः**</u> वने वसति । | मुख्य परीक्षा | 2023 |
| 3. <u>**पतङ्गाः**</u> अम्बरपथम् आपेदिरे। | पूरक परीक्षा | 2023 |
| **< 4 > अंक के प्रश्न** | | |
| **4. अधोलिखितश्लोकस्य भावार्थे रिक्तस्थानानि मञ्जूषायाः साहाय्येन पूरयित्वा पुनः लिखत–**<br>एक एव खगो मानी वने वसति चातकः ।<br>पिपासितो वा म्रियते याचते वा पुरन्दरम् ॥<br>भावार्थः- वने केवलम् (i) ………………… एव (ii) ………………… स्वाभिमानी पक्षी वसति। सः (iii) ………………… वा म्रियते अथवा केवलं जलं (iv) ………………… याचते अर्थात् सः सर्वं न याचते । | मुख्य परीक्षा | 2024 |

| | | |
|---|---|---|
| **मञ्जूषा-** चातकः, एकः, पिपासितः, इन्द्रदेवम् | | |
| **< 5 > अंक के प्रश्न** | | |
| **5. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**<br>रे रे चातक ! सावधानमनसा मित्र क्षणं श्रूयताम्<br>अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।<br>केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,<br>यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥<br><br>**(i) एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**<br>(क) अस्मिन् श्लोके कविः कं सम्बोधयति ?<br>(ख) कीदृशं वचः न ब्रूहि ?<br>(ग) अम्भोदाः कुत्र सन्ति ?<br><br>**(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2**<br>(क) बहवः के सन्ति ?<br>(ख) सर्वस्य पुरतः किं न वक्तव्यम् ?<br>(ग) के वृष्टिभिः वसुधां आर्द्रयन्ति?<br><br>**(iii) भाषिककार्यम् (केवलं प्रश्नद्वयम्) 2x1-2**<br>(क) 'केचिद् वृथा गर्जन्ति।' अत्र 'केचिद्' पदं केभ्यः प्रयुक्तम्?<br>(ख) 'बहवः अम्भोदाः' अनयोः पदयोः विशेषणपदं किम्?<br>(ग) श्लोके 'समक्षम्' इत्यस्य पदस्य कः पर्यायः प्रयुक्तोऽस्ति? | मुख्य परीक्षा | 2025 |
| **उत्तरमाला** | | |
| 1. के 2. कः 3. के 4. (i) एकः (ii) चातकः (iii) पिपासितः (iv) इन्द्रदेवम्<br>5. (i) (क) चातकम् (ख) दीनम् (ग) गगने<br>(ii) (क) बहवः अम्भोदाः सन्ति ।<br>(ख) सर्वस्य पुरतः दीनं वचः न वक्तव्यम् ।<br>(ग) अम्भोदाः वृष्टिभिः वसुधाम् आर्द्रयन्ति ।<br>(iii) (क) अम्भोदेभ्यः (ख) बहवः (ग) पुरतः | | |